# *हरिवरासनं विश्वमोहनम्*

हरिवरासनं विश्वमोहनम्
हरिदधीश्वरं आराध्यपादुकम्
अरिविमर्दनं नित्यनर्तनम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 1 ॥

शरणकीर्तनं भक्तमानसम्
भरणलोलुपं नर्तनालसम्
अरुणभासुरं भूतनायकम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 2 ॥

प्रणयसत्यकं प्राणनायकम्
प्रणतकल्पकं सुप्रभांजितम्
प्रणवमंदिरं कीर्तनप्रियम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 3 ॥

तुरगवाहनं सुंदराननम्
वरगदायुधं वेदवर्णितम्
गुरुकृपाकरं कीर्तनप्रियम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 4 ॥

त्रिभुवनार्चितं देवतात्मकम्
त्रिनयनं प्रभुं दिव्यदेशिकम्
त्रिदशपूजितं चिंतितप्रदम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 5 ॥

भवभयापहं भावुकावहम्
भुवनमोहनं भूतिभूषणम्
धवळवाहनं दिव्यवारणम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 6 ॥

कलमृदुस्मितं सुंदराननम्
कलभकोमलं गात्रमोहनम्
कलभकेसरि वाजिवाहनम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 7 ॥

श्रितजनप्रियं चिंतितप्रदम्
श्रुतिविभूषणं साधुजीवनम्
श्रुतिमनोहरं गीतलालसम्
हरिहरात्मजं देवमाश्रये
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा
शरणं अय्यप्पा स्वामी शरणं अय्यप्पा ॥ 8 ॥